A

# SAMAGRA SHIKSHA, KERALA

911

## Annual Evaluation - 2023-24

First Language - Paper I - Part I

## SANSKRIT

(For Academic and Sanskrit Schools)

**Class- IX**

Time -1½ Hours　　　　　　　　　　Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः । प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च अयं कालः उपयोक्तव्यः।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

**1. चतुर्णां प्रश्नानां समुचितमुत्तरं कोष्ठकात् चित्वा लिखत।** 4x1=4

क) अद्वैतसिद्धान्तप्रतिष्ठापकः कः ?

(कुन्तकाचार्यः, शङ्कराचार्यः, वाग्भटाचार्यः, वामनाचार्यः)

ख ) 'नासौ वसन्तसेना, असौ वसन्तसेनः'- कस्य वचनमिदम् ?

( मैत्रेयस्य, चारुदत्तस्य, आर्यकस्य, वर्धमानकस्य)

ग) शुल्बसूत्रम् कस्मिन् वेदाङ्गे अन्तर्भवति ?

(निरुक्ते, ज्योतिषे, कल्पे, व्याकरणे )

घ) दशरूपकेषु अन्यतमं भवति।

(निर्वहणम्, प्रकरणम्, आहार्यम्, वाचिकम्)

ङ) कर्कटकः .......... साकं जलाशयम् अगच्छत् ?

(बकेन, बकाय, बकात्, बकस्य )

**2. पट्टिकां पूरयत।** 4x1=4

| | कर्ता | कृतिः | विभागः |
|---|---|---|---|
| उदा- | कालिदासः | अभिज्ञानशाकुन्तलम् | नाटकम् |
| | ................ | दर्शनमाला | प्रकरणग्रन्थः |
| | शङ्कराचार्यः | सौन्दर्यलहरी | ................ |
| | श्रीमङ्गलं नीलकण्ठन् मूस्सत् | ................ | वास्तुशास्त्रम् |
| | .................... | निरुक्तम् | वेदाङ्गम् |

**3. उदाहरणानुसारं लिखत।** **1x1=1**

**उदा-** तत् + निरुक्तशास्त्रम् - तन्निरुक्तशास्त्रम्।

**क)** तत् + निवारणम् - ...................... ।

**4. उदाहरणानुसारं लिखत।** **1x1=1**

**उदा-** उन्नतस्य भावः - औन्नत्यम् ।

**क)** ईश्वरस्य भावः - ...................... ।

**5. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत।** **1x1=1**

**क)** भो श्रीमन्! इतः गन्तुम् अनुज्ञा दीयताम् ।

**6-10 अधो दत्तेभ्यः प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत ।** **4x2=8**

**6. समानार्थकपदं कोष्ठकात् चित्वा लिखत।**

**क)** कारागृहम् - .................. (अन्तःपुरम्/बन्धनगृहम्)

**ख)** शिलीमुखाः - .................. (मधुपाः / गजाः )

**7. ग्रन्थानां ग्रन्थकाराणां च पट्टिकां पूरयत।**

**भासः, मृच्छकटिकम्, शूद्रकः, ऊरुभङ्गम्**

| ग्रन्थः | ग्रन्थकारः |
|---|---|
| | |
| | |

**8. उदाहरणानुसारं वाक्यं परिवर्तयत ।**

**उदा -** निर्वेदेन किमपि प्रयोजनं नास्ति। **अलं निर्वेदेन।**

**क)** रोदनेन किमपि प्रयोजनं नास्ति। ...................... ।

**9. अधोदत्तं वाक्यं पठित्वा क्त्वान्त - तुमुन्नन्ताव्यये चित्वा लिखत।**

गृहमागतं बन्धुं दृष्ट्वा तं स्वीकर्तुं गृहनाथः उत्सुकोऽभवत्।

**10. श्लोकं पठित्वा पट्टिकातः उचितमाशयं चित्वा लिखत।**

अथ तस्य विभोरनन्तरो
विजयी सद्गुणरत्नसागरः।
बलभद्रसमानविग्रहो
वलभो नाम बभूव पार्थिवः ।।

**क)** नृपरामाय वलभः भटस्थलीं ददाति।
**ख)** वलभः इति प्रसिद्धः बलभद्रतुल्यः राजा बभूव।
**ग)** रामघटमूषिकः मूषिकवंशं स्थापितवान्।

**11. प्रादेशिकभाषया विवर्तयत।** **1x5=5**

संस्कृतसन्देशकाव्येषु प्रथमस्थानम् अलङ्करोति मेघसन्देशः। कविकुलगुरुः महाकविः कालिदास एव अस्य काव्यस्य प्रणेता। पश्चात् बहुभिः कविभिः अनेकानि सन्देशकाव्यानि विरचितानि। तेषु अन्यतमं भवति कोकिलसन्देशः। उद्दण्डशास्त्री इति प्रसिद्धेन संस्कृतकविना विरचिते कोकिलसन्देशे केरलेषु विद्यमानानां देशानां विवरणम् अस्ति।

**12-14 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।** **2x4=8**

**12. गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

अनेकैः कोशग्रन्थैः सुसम्पन्ना भवति संस्कृतभाषा। तेषु ग्रन्थेषु अन्यतमं भवति नामलिङ्गानुशासनम्। अमरसिंहेन विरचितम् इत्यनेन कोशोऽयम् अमरकोशः इति पश्चात् प्रसिद्धः अभवत्। इदानीमपि बहवः संस्कृतपण्डिताः अमरकोशात् कोशभागान् स्वीकृत्य स्वकीयेषु ग्रन्थेषु योजयन्ति।

**क)** नामलिङ्गानुशासनस्य कर्ता कः?

**ख)** **कोशोऽयम्** - इत्यस्य पदच्छेदं लिखत।

**ग)** नामलिङ्गानुशासनस्य अपरं नाम किम्?

**घ)** खण्डिकातः ल्यबन्तम् अव्ययं चित्वा लिखत।

**13. सूचनाः उपयुज्य 'मूषिकवंशम्' अधिकृत्य लघुटिप्पणीं लिखत।**

**सूचनाः -** अतुलः - मूषिकवंशम्- चरित्रकाव्यम्- उत्तरकेरलम्- पञ्चदश सर्गाः- रामघटमूषिकः।

**14. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।।

**क)** जलेन कः वारयितुं शक्यते ?

**ख)** श्लोकात् **'गजः'** इत्यर्थकं पदं चित्वा लिखत।

**ग)** सूर्यातपः केन वारयितुं शक्यते ?

**घ)** श्लोकात् एकं क्रियापदं चित्वा लिखत।

**15-17 अधोदत्तेभ्यः प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।** **2x4=8**

**15. सूचनाः उपयुज्य 'निरुक्तम्' अधिकृत्य लघुटिप्पणीं लिखत।**

**सूचनाः** - वेदाङ्गम् - निरुक्तम् - यास्कः - निघण्टुः - वैदिकशब्दकोशः- काण्डत्रयम्।

**16. रूपरेखां पठित्वा जीवनचरितं लिखत।**

'वाग्भटानन्दः' इति पश्चात् प्रसिद्धः वयलेरि कुञ्ञिक्कण्णन् गुरुक्कल् १८८५ एप्रिल् २७ दिनाङ्के कण्णूर् जिल्लायां जनिमलभत। तस्य पितरौ कोरन् गुरुक्कल्-चीरुवम्मा च स्तः। तर्कशास्त्रे, व्याकरणशास्त्रे च उपरिपठनं कृत्वा सः समाजपरिष्करणे प्रयत्नम् अकरोत्। १९०६ तमे वर्षे आत्मप्रकाशिका नाम संस्कृतविद्यालयः, १९२० तमे वर्षे आत्मविद्यासंघः च तेन स्थापितौ। अभिनवकेरलम्, आत्मविद्या, अध्यात्मयुद्धम्, प्रार्थनाञ्जलिः इत्यादयः तस्य प्रधानकृतयः। १९३९ तमे वर्षे सः दिवंगतः।

नाम - ....................................।
यथार्थनाम - ....................................।
जननम् - ....................................।
पितरौ - ....................................।
ग्रन्थाः - ....................................।
कर्ममण्डलम् - ....................................।
स्थापकः - ....................................।
मृत्युः - ....................................।

**17. उदाहरणानुसारं कोष्ठकात् पदानि चित्वा वाक्यं पूरयत।**

**जलं पिबति क्षीणः शुद्धं गजः**

उदा-

गजः
गजः पिबति।
गजः जलं पिबति।
गजः शुद्धं जलं पिबति।
क्षीणः गजः शुद्धं जलं पिबति।

**पिकः सन्तुष्टः गायति मधुरं गानं**

पिकः
................
........................
..............................
.....................................

✠ ✠ ✠